तदा आहनि संबुद्धो धर्मभेरीं वरमुत्तमां ॥
उत्तरानुचरा जनता अशीतिं आसि कोटियो ।
सर्वे ते निरवशेषा अभू बुद्धस्य श्रावकाः ॥
सन्निपाताः त्रयो आसि मङ्गलस्य महर्षिणो ।
क्षीणाश्रवाणां विरजानां शान्तचित्तानुतापिनां ॥
कोटीशतसहस्राणां प्रथमो आसि समागमो ।
द्वितीयो नवतिं कोटी अशीतिं तृतीयो अभूत् ॥
अहं तेन समयेन नागराजा महर्द्धिको ।
अतुलो नाम नामेन उत्सदकुशलसंचयो ॥
नागानां दिव्येहि तूर्येहि मङ्गलस्य महर्षिणो ।
अर्चये दुष्यणि दत्त्वान शरणं तमुपागमि ॥
सो मे बुद्धो व्याकार्षीत् मङ्गलो लोकनायको ।
अपरिमेये इतो कल्पे बुद्धो लोके भविष्यसि ।
शाक्यानां नगरे रम्ये स्फीते कपिलसाह्वये ॥
तस्य ते जननी माता माया नामेन भेष्यति ।
पिता शुद्धोदनो नाम तव भविष्यति गौतमः ॥
कोलितो उपतिष्यो च अया भेष्यन्ति श्रावकाः ।
क्षेमा उत्पलवर्णा च अया भेष्यन्ति श्राविका ॥
आनन्दो नाम नामेन उपस्थायको भविष्यति ।

9. BC °koṭiṁ tṛitī° B °tiyo abhi°. — 3. yadi utta° C yadâ cottara gṛihapatiḥ bu° BC °upâgami | uttarânu° (l. 5). — 5. C °jânaṁtâṁ koṭiṁ açitiyo B °jânatâṁ açitiṁ koṭiyo | .

6. B °çesham abhût | bu° C °çeshaṁ abhû bu° vakâṁ | . — 7. C °pâtân trayo°. — 8. C °cittâyinâṁ. — 9. C °thamam âsi°. — 10. BC °tiyaṁ nava° B °vatiṁ koṭiṁ açi° C °navati koṭi açitiṁ° B °tiyâ abhût ‖ .

11. B ahaṁ ca tena° C °ko | aparimeyam ite kalpe buddhaṁ loke bhavishyasi ‖ . — 12. BC °dakulasaṁ°. — 13. C nâgonâṁ divyatûrye°. — 14. C °ye pushpâṇi dadyâcca çara° B °shyâni ca datvâna°. — 15. C °buddha vyâkarshit maṁgalo lo° B °ddho vyâkâ°.

16. BC °rimeyam ito(C °te) kalpe°. — 17. C °gareṁ ramye°. — 19. BC °nâma nâmena tvaṁ bhavi° B °shyasi gautama | C °shyasi gauttamaḥ | . — 20. B kâlito° C kârito°.

21. C kshemâm utparavarṇṇâ ca agre bhe° çrâvakâṁ | B °çrâvakâ | . — 22. C °sthâpako bha°.

बोधि भविष्यति तुह्यं अश्वत्थो वरपादपः ॥
तस्य व्याकरणं श्रुत्वा मङ्गलस्य महर्षिणः ।
विरियं प्रग्रहेत्वान दृढं कृत्वान मानसं ।
चरन्तो बोधिचर्याणि नाहं कंचित्परित्यजे ॥
उत्तरं नाम नगरं सुन्दरो नाम चक्रियो ।
शिरिका नाम जनिका मंगलस्य महर्षिणो ॥
सुदेवो धर्मदेवो च अभून्सुः अग्रश्रावकाः ।
शीवाली च अशोका च अभून्सु अग्रश्राविका ॥
पालितो नाम उपस्थाको मंगलस्य महर्षिणो ।
बोधि तस्य नागवृक्षो बोधिवृक्षं सुपुष्पितं ॥
कोटीशतसहस्राणां संघो आसि महर्षिणो ।
तिष्ठमानो महावीरो तारेसि जनतां बहुं ॥
तारयि बहुजनतां वैस्तारिकं कृत्व शासनं ।
ज्वलितो अग्निस्कन्धो वा सुरियो वा समुद्गतो ॥
यथा सागरस्य ऊर्मियो न शक्यं गणयितुं ।
तथैव भगवतो पुत्रा न शक्यं गणयितुं ॥
सो च बुद्धो महाभागो सद्धर्मो च गणोत्तमो ।
सर्वे समनन्तरातीता अनुरिक्ता एव संस्काराः ॥

इति श्रीमहावस्तुअवदाने मंगलस्य वस्तु समाप्तं ॥

1. C bodhiṁ ca bhi bhavishyámi açvattha vara°. — 3. B virya pragra° C viryaṁ ca pragṛihitvána ° tvána námakaṁ | B °tvána námaṁ care°. — 4. B carento bodhicaryá sa na kaṁ° C °caryyásaṁ na kaçcit parityajet | . — 5. BC °ttaro náma° B °nagaro su° C °gare su ° ma kshetriyah.

6. C çirikâ° B °mahardddhiṇo sude°. — 7. C *omet les vers* 7-10. B °nsuḥ adya çrá°. — 8. B çrávako ca a °çrávaká | . — 9. B °upasthâyako°. — 10. C bodhiṁ ta° BC °tasya bodhivṛikshaṁ su° C °shpita suçobhitaṁ | .

11. C koṭiçata° BC °sraṇáṁ ási° C °ási sarve maha° BC °rshiṇáṁ | . — 12. B °vira tâ° BC °târehi ja° B °janato bahuṁ târa°. — 13. C târayishyasi táṁ târayiṁ kṛi° B °táṁ vastârikaṁ kṛi° BC °tvánuçásanaṁ jvali°. — 14. B °litâ agni° C °litán aguiskandhyâ vâ° BC °vâ sûryo vástaṁgato yathâ°. — 15. B yathâ hi sâga° C °unmiyo° B °utmiyo ° çakyaṁ ga° C °çakyaṁ ca gaṇa°.

16. B °thaiva ca bha° C °thaivaṁ bhaga° B °çakyaṁ ya gaṇa° C °çakyaṁ gaṇanâpituṁ | . — 17. C °bhágo buddharma ca °ttame | . — 18. B sarva sama° C sarvaṁ sama ° tiktânuraktán evamevaṁ saskâ° B °titán anuriktâ ekâ eva°. — 19. B °vadânakathâyáṁ ca maṁga° C °ne madgala °.

अथ चक्रवस्तुके आदि ॥ अनुहिमवन्ते कुण्डला नाम यक्षिणी प्रतिवसति ॥ सा दानि समं समं च पुत्रशता पंच प्रजायति । पुत्रसहस्रं प्रजाता सा कालं करोति ॥ ते पि वैशालिं ओजोहारका प्रेषिता ॥ वैशालिं गत्वा मनुष्याणामोजं हरन्ति ॥ रोगजाता आर्द्रा मण्डलको च अधिवासो च । मण्डलको रोगजातो यहिं कुले निपतति न किंचि शेषेति सर्वं हरति । अधिवासो नाम रोगजातो प्रदेशं हरति ॥ तदानि वैशालिका अधिवासेन रोगजातेन स्पृष्टा मरन्ति ॥ ते देवदेवां नमस्यन्ति ॥ तेषामेतदभूषि ॥ कस्मिंस्तु खल्वागते वैशालकानामावाधो प्रतिप्रश्राम्येया ॥ तेहि दानि काश्यपस्य पूरणस्य प्रेषितं ॥ आगच्छाहि वैशालकानाममनुष्यव्याधि उत्पन्नो त्वयि आगते प्रतिप्रश्रब्धो भविष्यति ॥ काश्यपपूरणो वैशालिमागतो न च तं व्याधिं प्रतिप्रस्रभ्यति ॥ तेषामेतदभूषि ॥ आगतो काश्यपो नैव च वैशालकानाममनुष्यव्याधिः प्रतिप्रस्रभ्यति ॥ तेहि दानि मस्करिस्य गोशालिपुत्रस्य प्रेषितं ॥ सो पि आगतो न च वैशालिकानाममनुष्यव्याधिः प्रतिप्रस्रभ्यति ॥ तेहि दानि ककुदस्य कात्यायनस्य प्रेषितं ॥ सो पि आगतो न च वैशालिकानाममनुष्यव्याधिः प्रतिप्रस्रभ्यति ॥ तहि दानि अजितस्य केशकम्बलस्य प्रेषितं ॥ सो पि आगतो न च वैशालकानाममनुष्यव्याधि प्रतिप्रस्रभ्यति ॥ तेहि दानि संजयिस्य वैरट्टिपुत्रस्य प्रेषितं ॥ सो पि आगतो न च वैशालकानाममनुष्यव्याधि प्रतिप्रस्रभ्यति ॥ तेहि दानि निर्ग्रन्थस्य ज्ञातिपुत्रस्य प्रेषितं ॥ सो पि आगतो न च वैशालकानाममनुष्यव्याधिः प्रतिप्रस्रभ्यति ॥ तेषां वैशालकानां ज्ञातिसालोहिता कालगता देवेहि उपपन्ना ॥ तेषामन्यतरा देवता वैशालकानामारो-

1². C "ṇḍalo nâma". — 3¹. C samaṁ samâ ca" BC "pañca çatâni prajâyanti | . — 3². BC yâ putra" B "trasâha" BC "hasra prajâ "kâraṁ ka". — 3³. BC tenâpa ve(C "veṇa)-çâliṁ " shitâ vaiçâ". — 3⁵. B "harati. — 4¹. BC "jâtâṁ âddhe(C "rddhe) maṇḍa". — 4³. C "jâto jahiṁ ku" B "tati | na" C "kiṁcid viçeshaṁti sa" B "ruti adhi".

6¹. C tadâni" BC "çâliko adhi" C "sprishṭo ma" BC "spṛishṭa(C "shṭo) maranti te deva". — 7¹. B "shi ka". — 7². C kasmiṁn nu " bâdhâ pra" BC "tipraçasteyâ tehi". — 8¹. BC "shitam âga". — 8². C "gacchehi" BC "çârakâ" C "kânâṁ amanu" B "praçaṁbhayishya" C "tiprasaṁçâ bhavi". — 9. C "parûṁraṇo" BC "gato ca na taṁ". — 10¹. C *omet cette phrase et les suivantes jusqu'à* 13³ *inclusivement. Il donne la suite dans cet ordre :* 14, 15¹, 13¹, 13², 15², 16, etc. — 10². B "pramrabhya".

11. B "karishya çoçâlipu". — 12. B "pramrabhyati | . — 13¹. C delhi dâ". — 13². C "to vai" B "pramrabhyati. — 14. C "jinasya "mbarasya" B "shitaṁ so pi". — 15¹. C "vyâdhiḥ prasrabhyati manushyavyâdhiḥ prasrabhyati | B "pramrabhya". — 15². C "saṁjayi velatiputra" B "veraḍhipu " shitaṁ so pi".

16. B so pi ââgato" C "kânâṁ ama " vyâdhiḥ pra" B "pramrabhya". — 17¹. B tehi tâni nigrantha" C "nirgratthasya" B "shitaṁ so pi". — 17². B "pramrabhya". — 18. BC "tisârohitâ" C "pannâḥ.

चयति ॥ ये एते तुभेहि आनीता अशास्तारो अशास्तारवादिनो न एते शक्ता वैशालकानाममनुष्यव्याधिं प्रतिप्रस्रभयितुं ॥ एष बुद्धो भगवां असंख्येहि कल्पेहि समुदागतो अर्हन्सम्यक्संबुद्धो अपरिशेषज्ञानदर्शनो महर्द्धिको महानुभावो सर्वज्ञो सर्वदर्शावी यच यामचेचसीमायां प्रतिवसति सर्वं तच ईतिकलहं कलकलं उपद्रवा उपसर्गा प्रशाम्यन्ति ॥ तमानेथ । तेन आगतेन वैशालकानाममनुष्यव्याधिः प्रतिप्रस्रभ्यते इति ॥

राजगृहे मन्दिरपुरे विहरति वरकमलगर्भसुकुमारो ।
सर्वा कलिकलहानि प्रशमयितानि जितक्लेशेन ॥
सोपद्रवं काञ्चननिभो यं प्राप्तो यामनिगम नगरं वा ।
ग्रामयति तच ईतयो रजमिव बलवां सलिलवृष्टि ॥
पाण्डरवर्णं काञ्चननिभं दिनकरपरिपूर्णचारुमुखं ।
वरसुरभिशीलगन्धं आनेथ शाम्यति तु व्याधि ॥

वैशाख्यां तोमरो नाम लेच्छविमहत्तरको महापचो महापरिवारो पण्डितो च ॥ सो गणेन अधीष्य प्रेषितो ॥ गच्छ राजगृहं तहिं बुद्धो भगवां प्रतिवसति । श्रेणियस्य बिम्बिसारस्य याचितवासो प्रतिवसति ॥ तं गत्वा वैशालकानां लिच्छवीनां वचनेन वन्दनां वदेसि सपरिवारस्य अल्पाबाधतां च अल्पातंकतां च सुखस्पर्शविहारतां च पृच्छेसि एवं च वदेसि ॥ वैशालकानां भगवं लिच्छवीनाममनुष्यव्याधि उत्पन्नो बहूनि प्राणसहस्राणि अनयव्यसनमापद्यन्ति । साधु भगवानर्थकामो हि-

1. BC "tubhyamîhi" B "hi anîti açâ" C "hi ânîti açâ" BC "stârâ çâstâ" C "stâro vâdino naite ça" B "pramrabhya" C "prasrabhavitum | . — 2. C "gavân asamkhyeyehi ka" gato ahan sa" buddhaḥ apa" B "rçâvî | yâva grâma" BC "makshatra" C "traçimâyâm pratiprasrabhyati | sarvam" B "sati | sa" BC "tra itika" B "ham kâlakallam upa" C "ham kârakam kallâpradravâ" rgân praçâsyanti | B "rgân pra". — 5¹. BC ânetha tena". — 5². BC "âgate vai" B "pramrabhya".

7. C "lagabhe suku" B "garbhe kusumâro sa". — 8. BC sarva kalikalahaiti praça(C ṇa)mayi" kleço sopa". — 9. C "managara nigamam vâ" B "ram vâ çâ". — 10. BC çâmyanti | tatra itayo rajatam iva" C "lavân saliladṛishṭim B "ladṛishṭim pâ".

11. C pâtum vikalakâ" B "ṇḍavikalakâ" bham | di" BC "karam pari" mukham vara". — 12. C vacasu" B "gandhagam âne" BC "ânethiyâ çâmyatha tu iti ‖ . — 13. BC "tomalo nâ" B "ttaramahâ" BC "mahâyaksho" B "to ca so ga". — 14¹. BC "adhyashya prekshito | . — 14². B "mhiçilasyâcita" BC "vâse pra" ti tam". — 15. C tam âga" nâm lecchavinam vaca" ca alpatamkâtâm ca" sukham ca spa" B "sukham spa" cchesi | evam" C "vam va cadesi B "desi vaiçâ".

17. B "kâṇâm bha" BC "gavâm liccha" C "vyâdhiḥ utpa" prâṇisaha". — 18. B sâdhû bha" C "arthamkâ" B "hiteshî" C "gacchayâ" dâyâ.

तेषी वैशालिमागच्छेया अनुकम्पामुपादाय ॥ अथ तोमरो लेच्छविगणस्य प्रतिश्रुत्वा यथानुरूपेण परिवारेण सार्धं भद्राणि यानानि आरुहित्वा वैशालितो नगरातो निर्गम्य येन राजगृहं नगरं तेन प्रयासि ॥ अथ खलु तोमरो लेच्छवि राजगृहनगरं गत्वा प्रविशित्वा राजगृहनगरं येन वेणुवनं कलन्दकनिवापं तेन प्रक्रमि भगवन्तं दर्शनाय उपसंक्रमणाय पर्युपासनाय ॥ तेन खलु पुनः समयेन भगवान्तदहो पोषधे पंचदश्यां पूर्णायां पूर्णमास्यां पञ्चानां भिक्षुशतानां अन्यायै च जनतायै अनेकसहस्रायै परिषायै धर्मं देशयति आदौ कल्याणं मध्ये कल्याणं पर्यवसाने कल्याणं स्वर्थं सुव्यञ्जनं केवलपरिपूर्णं परिशुद्धं पर्यवदातं ब्रह्मचर्यं प्रकाशयति ॥ अथ तोमरो लेच्छवी यावत्तका यानस्य भूमिः तावद्यानेन गत्वा यानाद्वतीर्य पद्भ्यामेव येन भगवांस्तेनोपसंक्रमि ॥ सो दानि महेशाख्यां परिषां सन्निपतितां न शक्नोति प्रसह्य भगवन्तमुपसंक्रमितुं ॥ सो दानि एकांसमुत्तरासंगं कृत्वा येन भगवांस्तेनांजलिं प्रणामेत्वा भगवन्तं गाथाये अध्यभाषि ॥

उपोषधे पंचदशीविशुद्धये
उपासितुं ते ऋषयो समागता ।
शक्रो च देवो चिदशान इन्द्रो
पुरस्कृतो तेषु ऋषह्यसाहि ॥
विरोचमानो भाषसि उत्तमं पदं
धर्मेण तर्पेसि बहुं इमां प्रजां ।
महां व मेघः सलिलेन मेदिनीं
ते तुह्य श्रुत्वा मधुरामिमां गिरां ॥
अनेलिकां धारयतो महामुने
नमस्कृत्वा अंजलिं वन्दमाना ।

1. BC "tomalo le" C "cchaviga" B "rûpe pari" C "sâriddha bhadrâ" B "tena prâyâsi ‖ . — 3. BC "nagare gatvâ" C "grihaṁ nagaraṁ ye" naṁ karanda" BC "paṁ teno prakra". — 5. C "shadhe yaṁcadaçyâṁ pûrṇṇamâsyâṁ paṁcâ" B "pûrṇṇamâyâṁ pû" çayati ‖ âdan" BC "madhya kalyâ" C "svartha suvyaṁja" BC "kevalaṁ pari" C "hmacarya saṁpraka".

8. B "yâvatakaṁ yâna" C "yâvattakaṁ yâ" bhûmittovad yâ" C "padbhyâṁm eva" gavân teno". — 10. C "çâkhyaṁ pari" B "knoti | prasapka (?) bha".

11. BC "ttarâṁsaṁgaṁ" C "gavânstenâṁ". — 13. BC "dhe yaṁvaçipûrṇṇamâsi viçu" gataṁ ‖ . — 15. BC çakraṁ ca devâ tridaçânâm indraṁ pu" B "teshâṁ asahyasohi vi" C "teshâ asahya so hṛidi.

17. B "mâno | bhâ" C "shami utta" B "rpesi | bahum imâṁ prajâ mahâṁ" C "bahum imâṁ. — 19. BC mahâṁ ca meghaḥ" niṁ | te" giràm aneli".

21. C "kâṁ raya" B "mune | na" BC "skṛitâṁjaliṁ" mânâ çara".

शरणन्ते गच्छाम असह्यसाहि
तेषां सुलब्धं च सुआगतं च ॥
स तोमराणामहमन्तिके भवं
ये ते प्रसन्ना शरणं उपेन्ति ।
अथ अप्रमत्ता सुगतस्य शासने
काहिन्ति जातीमरणस्य अन्तं ॥

गाथापर्यवसाने महता जनकायेन अन्तरो दिन्नो ॥ अथ खलु तोमरो लेच्छवी येन भगवांस्तेनोपसंक्रमित्वा भगवतः पादौ शिरसा वन्दित्वा भगवन्तमेतदवोचत् ॥ वैशालिका भगवं लेच्छवियो सदृढवाला अभन्तरवैशालका च बाहिरकवैशालका च भगवतः पादा शिरसा वन्देन्ति सश्रावकसंघस्य सुखं च स्वर्गविहारतां च पृच्छेन्ति एवं च वदेन्ति ॥ वैशाल्यां भगवन्मनुष्यव्याधि उत्पन्नः बहूनि प्राणिसहस्राणि अनयव्यसनमापद्यन्ति भगवां च अनुकम्पको कारुणिको सदेवकस्य ॥ साधु भगवां वैशालिमागच्छेय वैशालिकानामनुकम्पामुपादाय ॥ भगवानाह ॥ तथागतो तोमर राज्ञो श्रेणियस्य बिम्बिसारस्य याचितवासो वसति गच्छमनुजानापेहि ॥ अथ खलु तोमरो लेच्छवि भगवतो पादौ शिरसा वन्दित्वा भगवन्तं च त्रिष्कृत्वः प्रदक्षिणीकृत्वा भिक्षुसंघं च येन राजगृहं तेन प्रक्रामि ॥ अथ खलु तोमरो लेच्छवि येन राजा श्रेणियो बिम्बिसारस्तेनोपसंक्रमित्वा राजानं श्रेणियं बिम्बिसारं साधु च सुष्ठु च प्रतिसंमोदेत्वा एतदुवाच ॥ वैशालीयं महाराज अमनुष्यव्याधि उत्पन्नो बहूनि प्राणिसहस्राणि अनयव्यसनमापद्यन्ति ॥ तहिं षच्छास्तारो संमता आनीता काश्यपो च पूरणो मस्करी च गोशाली अजितो च केशकम्बली ककुदो च कात्या-

1. C °cchâmaḥ asa° B °teshâṁ | sula ° taṁ ca toma°. — 3. BC tomarâ° B °râṇânti bhavâye me prasa° C °râṇâm antike bhavân me praçannâ çaraṇam upe°. — 5. B atha matto suga° C atha tomaro suga ° ṇasyântaṁ | .

7¹. BC °kâye ananta°. — 7². B °tomalo le° BC °gavânsteno°. — 9. BC vaiçâliko bhaga° C °gavan lechaviyo° BC °bâlo abhyantaravaiçâlakâ ca bhaga° C °vato pâdau çirasâ vandeti saçrâ ° rçaviharatâṁ ca priccheyanti ° vadanti | .

11. C °gavau amanushyavyâdhir utpa° BC °nayato vyasa ° dyanti | bha° B °gavân ca anu° BC °kasya sâdhû°. — 12. B sâdhû bha° C sâdhu bhaṁga° BC °çâliko anu°. — 13². BC °mbiçâlasya vâse va° B °jânâ .ehi ‖ C °nâyehi | . — 14. C °chavi bha° B °gavaṁto pâ ° vantam eva ca trishṭûbhyaṁ(?) pra° C °vantevaṁ ca trishkṛitya pra ° kṛitya bhikshu° B °prakâmi ‖ .

16. BC °mbiçâlas teno ° mbiçâraṁ ° sushṭu ca pra°. — 18. BC °anayâto vyasa°. — 19. C tarhi esha çâstâ° BC °stâra saṁmato âni° C °ca puraṇo° B °maskeri ca gopâli | aji° C °gopâri aji ° mbari | kâtyâya° B °mbali | kâtyâyana saṁjaº C °nirgratthe ca jñâ°.

यनो संजयी च वेरट्ठिकपुत्रो निर्ग्रन्थो च ज्ञातिपुत्रो ॥ एतेहि आगतेहि वैशाल-
कानाममनुष्यव्याधि नोपशाम्यति ॥ ततो महाराज लेच्छवीनां देवताहि आरो-
चितं ॥ एष बुद्धो भगवानस्मिंये धर्मानुभावेन हि समुदागतो सदेवकस्य लोकस्य
लेनो त्राणो शरणो परायणो देवातिदेवो शास्ता देवमनुष्याणां नागानामसुराणां
यक्षाणां राक्षसानां पिशाचानां कुम्भाण्डानां ॥ सो यं यामचेवसीमसमाक्रमति तत्र
सर्वे ईतिकलिकालकर्णी प्रशाम्यन्ति बुद्धानुभावेन धर्मानुभावेन संघानुभावेन ॥
तमानेथ तेन आगतेन वैशाल्यानाममनुष्यव्याधिः प्रशाम्यतीति ॥ साधु महाराज
भगवन्तमनुजानाहि वैशालिं गमनाये अनुकम्पामुपादाय ॥ एवमुक्तो राजा श्रे-
णियो विम्बिसारो तोमरं लेच्छविमेतदुवाच ॥ सचे वासिष्ठ वैशलका लेच्छवयो
भगवतो राजगृहातो वैशालिं गच्छन्तस्य एवं प्रत्युद्गमनं करोन्ति यावत्स्वकं विजितं
यथाहमनुयानं करोमि यावत्स्वकविजितमेत्थे हं भगवन्तमनुजानये राजगृहातो
वैशालिं गमनाय ॥ अथ खलु तोमरो लेच्छवी राज्ञो श्रेणियस्य विम्बिसारस्य
प्रतिश्रुत्वा वैशालिं गणस्य दूतां प्रेषयसि ॥ एवं वासिष्ठाहो राजा श्रेणियो विम्बि-
सारो जल्पति ॥ अथ खलु ते दूता तोमरस्य लेच्छविस्य प्रतिश्रुत्वा वैशालिं गत्वा
लेच्छविगणस्य आरोचेसि ॥ एवं वासिष्ठाहो राजा श्रेणिको विम्बिसारो तोमरस्य
लेच्छविस्य जल्पति । सचे वैशलका लेच्छवयो भगवतो राजगृहातो वैशालिं गच्छ-
न्तस्य एवं प्रत्युद्गमनं करोन्ति यावत्स्वकं विजितं यथा अहमनुयानं करोमि याव-
त्स्वकं विजितं एत्थे हं भगवन्तमनुजानेयं राजगृहातो वैशालिं गमनाय ॥ एवमुक्ते
वैशालेयका लेच्छवयः तान्दूतां ..... ॥ एतदवोचो वासिष्ठाहो राजा श्रे-
णियो विम्बिसारो लेच्छविगणस्य वचनेन ॥ करिष्यन्ति महाराज वैशालका लेच्छ-

1. BC °myati | tehi cāgatehi vaiçālakānām amanushyavyādhib(C °dhim̃) praçāmyati(C °te)ti | tato°. — 2. B °viṇāṁ devatehi ā°. — 3. C °khyeya dhamānu° B °ye dhamānu° C °bhāvenchi° B °dāgamo | sade° C °lokasya hitasukhārthaṁ sadevakasya lokasya layaṇo trāṇo° B °leṇo trāṇo çaraṇo çaraṇo parā° C °devātidevā çā ° surāṇāṁ rākshasā° B °ṇḍānāṁ so yaṁ°. — 5. BC °kshetraçima(C °mā)m ākrāmanti | tatra sarve itika° C °tikarṇṇikārakarṇṇika praçā° B °kālakarṇṇi praçāmyanti | bu ° saṁghā ° vena ānetha°.

7¹. BC ānetha | tena° C °āgacchatena°. — 7². C °çāliṁm anugama°. — 8. C evaṁm ukte rājā° BC °mbiçāro°. — 9. BC sarve vā° C °vāçishṭhā° BC °thāham anuprāptaṁ karomi ° jitam e vyūhaṁ ° vantaṁm anu° C °nujāye rājagrihato vai°.

12. B °çreṇiyasya° C °mbiçārasya° BC °dūtaṁ pre°. — 13. BC °vāçishṭhā° C °shṭhāro rājā°. — 14. C °tomalasya ° chavigaṇa°. — 15. BC °vāçishṭhā° C °niyo bimbiçāro° BC °cchavi jalpati | .

16. B sarve vaiçā° C sarva vaiçālako leccha° BC °karoti | yāva ° thā ahaṁm anujānaṁ(C °nāṁ) karo ° svakaṁ ‖ viji° C °jitaṁm etsye° B °neyaṁ | rāja°. — 18. C evaṁm ukte ° çālakā lecchavayo tān° B °dūtāṁ eta°. — 19. B etadavakta° BC °vāçishṭhā ° mbiçāro(B °lo) lecchavayo gaṇa° nena ka°. — 20. B °shyanti | ma° C °çārakā lecchavayo viji° B °cchavīṇāṁ vi°.

वयो भगवतः प्रत्युद्गमनं यावल्लेच्छवीनां विजितं ॥ अथ खलु ते दूता लेच्छविगणस्य प्रतिश्रुत्वा राजगृहं गत्वा तोमरस्य आरोचेन्तुः ॥ अथ खलु तोमरो लेच्छविः दूतानां वचनं प्रतिश्रुत्वा येन राजा श्रेणिको बिम्बिसारो तेनुपसंक्रमित्वा राजानं श्रेणियं बिम्बिसारमेतदुवाच ॥ करिष्यन्ति महाराज वैशालका लेच्छवयो भगवतः प्रत्युद्गमनं ॥ साधु भगवन्तमनुजानाहि वैशालिं गमनाय अनुकम्पामुपादाय ॥ भगवां दानि राज्ञा श्रेणियेन बिम्बिसारेण अनुज्ञातो वैशालिं गमनाय अमात्या च आणत्ता याव च राजगृहं याव च गंगायाः तीर्थं मार्गं प्रतिजागृथ अष्टपदसमविषमं पाषितलजातं विततविताने चित्रदुष्यपरिक्षिप्तं ओसक्तपट्टदामकलापं धूपितधूपनं सिक्तसंमृष्टं मुक्तपुष्पावकीर्णं । नावासंक्रमं बन्धापेथ येन भगवां सश्रावकसंघो गंगायां तरिष्यति वैशालिं गमनाय । अर्धयोजनिके च अन्तरे मण्डपसंविधानं का[रापेथ अन्नपान]संविधानं कारापेथ शय्यासनसंविधानं च भगवतः सश्रावकसंघस्य सर्वं सुखोपधानं यथा भगवां सश्रावकसंघो राजगृहातो सुखं वैशालिं गच्छेय भिक्षुसंघश्च ॥

मनसा देवानां वचसा पार्थिवानां ।
नचिरेणाढ्यानां कर्मणा दरिद्राणामिति ॥

राज्ञा च आणत्तं अमात्येहि च सर्वं प्रतिजागृतं यथा आणत्तं ॥
भगवां संप्रस्थितो सार्धं भिक्षुसंघेन ॥ राजा श्रेणियो बिम्बिसारो सयुग्ययवाहनो सदेवीकुमारामात्यपरिजनो राजर्हेहि पंचहि च्छत्रशतेहि धार्यमाणेहि ओसक्तपट्टदामकलापेहि सध्वजपताकेहि महता राजानुभावेन महता राजऋद्धीये महताये विभूपाये भगवन्तं वैशालिं गच्छन्तं समनुयाति अर्धयोजनिकेनान्तरावासेन यावत्स्वकं विषयं गंगायाः तीरं ॥ अश्रोषुः वैशालका लेच्छविका एदृशाये वि-

1. BC "cetsuḥ | . — 2. C atha tomaro "çreṇikâ bibiçâlo te" B "mbiçâro" C "nupamaṁ kra" BC "mbiçâra". — 5. C "gavato pra" B "manaṁ sâdhu".

6. C "mbiçâre" B "nâya | amâtyâ" C "yâvacca râ" BC "gṛihaṁ gaṁgâyâṁ tîrthamârgaṁ" gritha | asbṭapadumaṁ sama" C "samavisha" ptaṁ oçakta" BC "siktasaṁsṛishṭaṁ(B "shṭhaṁ) mu" B "kiraṇaṁ nâ". — 9. BC "ndhâyetha | yena" C "gaṁgâye tari" B "shyati | vai". — 10. C addhayo "dhânaṁ kroçaṁ vidhâ" B "dhânaṁ kâsaṁ vi" petha | çaryâsana" C "sanavidhâ" gavato saçrâ" sarvasukhâpadhâ" B "padhâraṁ ya" C "gavân saçrâ" saṁgho ca | .

15. B "nâṁ ca vaca". — 15. B "reṇâghânâṁ" C "reṇâdyâ(?)nâṁ" drânam iti ‖ .

16. C "sarva pratijâgṛitha yathâ". — 17¹. C "gavât saṁpra" sârddha bhi". — 17². C "biṁbiçâro sayu" B "sayugâbala" BC "devisakumâro(C "ro' mâ)tya" C "râjârahehi" hi oçakta" BC "japatakehi" vaiçâli gacchaṁ samanu" BC "manujâti a" C "arddhayonikenântarâvâsena" B "nântavâsena" vishamaṁ gaṁ" BC "gaṁgâyâṁ tiraṁ açro".

21. C âçloshit | vaiçârakâ" BC "ochavekâ" vidhâye râ" mbiçâro".

धीये राजा श्रेणियो बिम्बिसारो भगवतो अनुयानं करोति राजगृहातो वैशालिमागच्छन्तस्येति ॥ श्रुत्वा च पुनः याव च वैशाली याव च गंगातीर्थं वैशालकानां लेच्छवीनां विजितमध्यान्तरे मार्गं प्रतिजाग्रंसु अष्टपदसममविषमं पाणितलजातं सिक्तसंमृष्टं मुक्तपुष्पावकीर्णं विततवितानं चिचदुष्यपरिच्छिन्नं ओसक्तपट्टदामकलापं धूपितधूपनं ॥ देशदेशेहि च नटनर्तनच्छल्लमल्लपाणिस्वर्या स्थापयेन्सु । अर्धयोजनिकेन च अन्तरेण मण्डपसंविधानं च कारयेन्सु शय्यासनसंविधानं च पानीयसंविधानं च भक्तसंविधानं च भगवतः सश्रावकसंघस्य ॥ अभ्यन्तरवैशालीतो चतुरशीति रथसहस्राणि योजापयित्वा द्वेचतुरशीति रथसहस्राणि योजापयित्वा सवैजयन्तिकानि सनन्दिघोषाणि सपुष्पमालानि सच्छत्रध्वजपताकानि प्रभूतं च गन्धमाल्यमादाय स्वकस्वकानि भद्राणि यानान्यभिरुहित्वा महता राजानुभावेन महता राजऋद्धीये महतो जनकायस्य हक्कारहिक्कारभेरीमृदंगमरुपणवशंखसन्निनादेन वैशालीतो नगरातो निर्यांता भगवन्तं प्रत्युद्गच्छेन्सु यावद्गंगातीर्थं भगवतः पजार्थं ॥ तेषां पि तं एवं संविधानरूपं अभूषि ॥ सन्त्यत्र लेच्छवयः नीलाश्वा नीलरथा नीलरश्मिप्रतोदा नीलयष्टी नीलवस्त्रा नीलालंकारा नीलउष्णीषा नीलच्छत्रा नीलखड्गमणिपादुकवालव्यंजनाः ॥ तत्रेदमिति उच्यते ॥

नीलाश्वा नील रथा नीला रश्मिप्रतोदमुष्णीषा ।
नीला च पंच कुदा नीला वस्त्रा अलंकारा ॥

सन्त्यत्र लेच्छवयः पीताश्वाः पीतरथा पीतरश्मिप्रतोदयष्टी पीतवस्त्राः पीतालंकारा पीतोष्णीषा पीतच्छत्रा पीतखड्गमणिपादुका ॥ तत्रेदमुच्यते ॥

2. C °çâlimî yâva ° tirtha vai ° cchavinâmî vi ° jâgrisuḥ | ashṭa° B °grasûsu | ashṭhapa° BC °padumamî sama° C °samavishamî pâṇi° B °vishamî paṇita° C °tamî sikta° BC °ktasamsṛishṭa mukta° B °panamî deçede°. — 5¹. B deçedeçehi ca° C °hiva naṭanarttakaṛilla° B °yetsu C °yetsuḥ. — 5². C °yetsuḥ | ça° B °yetsu | çaryâsana° C °yyâsanamî samvi°.

7. C °vaiçârito ca ° nti kâcit sanadigho° B °nti kâci sana° C °bhâvena mahatâ riddhi° B °râjariddhi° BC °ddhiyena mahato° C °mṛidadgamarupaṇavasamkha° BC °niryâto bhaga° B °cchetsu | yâ° C °cchetsuḥ | yâ° B °rthamî bha° C °gavato pû° B °jârthamî teshâmî°.

13¹. C keshâmîcit taivamî samvi° B °shâmî vi tamî e°. — 13². C °vayo nîlasyâ nîlarathâmî ni° B °yaḥ nîlâçyâ nîla° BC °pratopâ ni° B °yashṭi ni° C °lâlamîkâna nîla° B °lamîkâla nîla° BC °khadgapâṇipâdukâ vâla°.

16. BC nîlâçva ni ° nîla raçmipracoda° B °mushṭisho ni° C °mushṭipâṇi ni°. — 17. BC nîlâ pamîka kakudâ nîla-vastrâlamîkârâ(B °lâ) santya°. — 18. C °vayo | pî ° pracoda° BC °danâya° C °yashṭi pitavyaḥstrâ pîtâlamîkâraḥ pî° BC °khadgapâṇipâ°.

पीताश्वा पीत रथा पीता रश्मिप्रतोदमुष्णीषा ।
पीता च पंच ककुदा पीता वस्त्रा अलंकारा ॥

सन्त्यत्र लेच्छवयो मंजिष्ठाश्वा मंजिष्ठरथा मंजिष्ठप्रतोदयष्टी मंजिष्ठवस्त्रा मंजिष्ठालंकारा मंजिष्ठउष्णीषा मंजिष्ठच्छत्राः मंजिष्ठमणिपादुकवालव्यंजनाः ॥ तच्चेदमुच्यते ॥

मंजिष्ठा अश्वरथा मञ्जिष्ठ रश्मिप्रतोदयष्टी च ।
मंजिष्ठ पंच ककुदा मंजिष्ठ वस्त्रअलंकाराः ॥

सन्त्यत्र लेच्छवयो लोहिताश्वा लोहितरथा लोहितप्रतोदयष्टी लोहितवस्त्रा लोहितालंकारा लोहितउष्णीषा लोहितच्छत्राः लोहितखड्गमणिपादुकवालव्यंजनाः ॥ तच्चेदमुच्यते ॥

लोहिता अश्वा रथा च लोहित रश्मिप्रतोदयष्टी च ।
लोहित च पंच ककुदा लोहित वस्त्रा अलंकाराः ॥

सन्त्यत्र लेच्छवयो श्वेताश्वा श्वेतरथा श्वेतप्रतोदयष्टी च श्वेतवस्त्राः श्वेतालंकाराः श्वेतोष्णीषाः श्वेतच्छत्राः श्वेतखड्गाः श्वेतमणिपादुकवालव्यंजनाः ॥ तच्चेदमुच्यते ॥

श्वेताश्वा श्वेत रथा श्वेत रश्मिप्रतोदयष्टी च ।
श्वेता च पंच ककुदा श्वेता वस्त्रा अलंकाराः ॥

सन्त्यत्र लेच्छवयो हरिताश्वा हरितरथाः हरितरश्मिप्रतोदयष्टी च हरितवस्त्रा

1. BC "çvâ pîta vastrâ pîtarathâ pîtaraçmi" C "pracodamu" B "shâ pî". — 2. BC pîtâ pañca " pîtava" B "vastrâ pîtaṁ" C "strâlaṁkârâḥ | B "kârâ santya". — 3. BC "jishṭâçvâ mañjishṭara" C "jishṭapra" BC "yashṭi mañjishṭava" B "jishṭaalaṁ" C "strûlaṁkârâḥ | santya" (l. 8) B "jishṭaishṇishâ " jishṭaccha " jishṭamaṇipâduvâla".

6. B "jishṭâçvâ " jishṭa ra " danâyashṭi ca pañca". — 7. B "jishṭa vastrâlaṁkârâḥ santya". — 8. C "vayaḥ lohi " pracodaya" BC "dayashṭi lohi" B "hitâraṁkârâ" C "kârâ lohitacchatrâḥ "khadgama" BC "dukâ vâlavyaṁ".

11. BC lohitâçvâ lohita rathâ lohita raçmi" C "pracodayashṭi ca" B "shṭi ca lohita". — 12. BC "lohita paṁ" C "kudo lo" BC "vastrâlaṁkâ" C "kârâ vâravyaṁjanâḥ | B "kârâḥ santya". — 13. C "tra sacchayo çvetâ " pracodayashṭi ca" B "shṭi ca çveçveta" C "vastrâ çve" kârâ çvetoshṇishâ çve" B "echastrâḥ çve" C "echatrâ çve " khadgâ çvetavastrâlaṁkârâḥ çvetamaṇipâdukâ ca | B "dukâ ca vâla". — 15. B çvetoçvâ" BC "çveta raçmi" C "pracodanashṭi ca çve" B "tode ca yashṭi ca çvetâ".

16. BC çvetâ pañca " dâ çveta vastrâlaṁ" C "kârâḥ vâravyaṁjanâḥ | . — 17. C "echavayaḥ hari " rathâ ha " çmipracora haritavastrâ haritâraṁkârâḥ ha " khadgâ ha " dukâḥ | B "dukâ vâlavyaṁ".

हरितालंकारा हरितोष्णीषा हरितच्छत्रा हरितखड्गा हरितमणिपादुकवालव्यंजनाः ॥ तत्रेदमुच्यते ॥

हरिताश्वा हरित रथा हरिता रश्मिप्रतोदयष्टी च ।
हरिता च पंच ककुदा हरिता वस्त्रा अलंकाराः ॥

सन्त्यत्र लेच्छवयो व्यायुक्ताश्वा व्यायुक्तरथा व्यायुक्तरश्मिप्रतोदयष्टी व्यायुक्तवस्त्रा व्यायुक्तालंकारा व्यायुक्तउष्णीषा व्यायुक्तच्छत्रा व्यायुक्तखड्गा व्यायुक्तमणिपादुकवालव्यंजनाः ॥ तत्रेदमुच्यते ॥

व्यायुक्ता अश्वरथा व्यायुक्त रश्मिप्रतोदयष्टी च ।
व्यायुक्त पंच ककुदा व्यायुक्त वस्त्रअलंकाराः ॥

सन्त्यत्र लेच्छवयो सुवर्णच्छत्रेहि कुंजरेहि नानालंकारभूषितेहि ॥ सन्त्यत्र लेच्छवयो सुवर्णशिविकाहि सर्वरतनभूषिताहि ॥ सन्त्यत्र लेच्छवयो सुवर्णमयेहि रथेहि सवैजयन्तेहि सनन्दिघोषेहि सखुरप्रवाग्रीहि उच्छ्रितच्छत्रध्वजपताकेहि ॥ एवंरूपेण अनुभावेन एवंरूपाये विधिये एवंरूपेण समुदयेन एवंरूपाये राजऋद्धीये एवंरूपाये समृद्धीये एवंरूपाये संवृत्ताये एदृशाये विभूषाये वैशालका लेच्छवयो द्वेचतुरशीतिहि यानसहस्रेहि गोशृंगी च आम्रपालिका च तद्यथा सो पि महाजनकायो भगवन्तं प्रत्युद्गता यावद्गंगाया तीर्थे ॥

भगवां गंगाये पारिमे कूले राज्ञो श्रेणियस्य बिम्बिसारस्य मागधकानां ब्राह्मणकानां धर्मया कथया संदर्शयित्वा समुत्तेजयित्वा संप्रहर्षयित्वा मागधकानां ब्राह्मणकानां चतुरशीति सहस्राणि धर्माभिसमये प्रतिष्ठापेत्वा येन वैशालका लेच्छ-

3. BC *harita raçmi* C *pracodaya* B *shṭi ca haritâ*. — 4. BC *harita vastrâlaṁ* C *kârâḥ vâravyaṁjanâni* | . — 5. C *pracodayashṭi vâ* *vastrâlaṁkârâ vâyuktaûshṇî* *khadgâ vâ* BC *pâduka vâla*.

8. BC *yuktâçvâ vyâyukta rathâ vyâyukta raçmi* C *çmipracodayashṭi ca* B *shṭi ca vâ*. — 9. B *vastrâlaṁkâ* C *strâraṁkârâḥ vâravyaṁjanâḥ* | . — 10¹. C *rṇṇacchratehi kuṁjalehi mâ*. — 10². C *rṇṇaçirikâhi sarvaratnabhû*.

11. B *rṇṇamayerathe* C *rṇṇamayarathe* B *ṭapravâçehi ucchri* C *khurapramâṇehi uchitacchatra*. — 12. C *rûpeṇânubhâ* B *vidhiye* | *evaṁ* *râjariddhiye* BC *evaṁrûpâsamvarttaye* | *edṛiçâ* *turaçîti râjâna sahe* | B *srehi* || *gâçriṁ* C *gi ca âsrapâ* B *mrapâliyâlikâ ca* | *tadyathâ yo pi* BC *nakâye bhaga* *jgatâye* | *yâvad gaṁ* C *gadgâyâṁ tirthe* B *rthaṁ bhaga*.

17. B *me kule râ* C *ṁbiçâlasya mâ* *nâṁ ca brâhma* C *thayâṁ saṁ* B *rçayitvâ samuttejayi saṁ* C *tvâ maṁpraha* *dhakâṁnâṁ catura* B *dhakânâṁ* | *catura* *ye praviṣhṭâyetvâ* C *mantresi* | .

वयो तेन विलोकेत्वा भिक्षूणां आमन्त्रेति ॥ भिक्षवो न दृष्टपूर्वा देवा वायस्त्रिंशाः सुदर्शनातो नगरातो उद्यानभूमिमभिनिष्क्रमन्ता । ते एतरहि वैशालका लेच्छवयो पश्यथ ॥ तत्कस्य हेतोः ॥ तादृशाये व भिक्षवो ऋद्धीये देवा वायस्त्रिंशा सुदर्शनातो नगरातो उद्यानभूमिमभिनिष्क्रमन्ति ॥

स्फीतानि राज्यानि प्रशास्यमाना
सम्यक् राज्यानि करोन्ति ज्ञातयो ।
तथा इमे लेच्छविमध्ये सन्तो
देवेहि शास्ता उपमामकासि ॥
वायस्त्रिंशा येहि न दृष्टपूर्वा
उद्यानभूमिं अभिनिष्क्रमन्ता ।
एतादृशी समिति अभूषि तेषां
यथा इयं समृद्धि लेच्छवीनां ॥
सुवर्णच्छत्रेहि च कुंजरेहि
शिविकाहि सौवर्णमयीहि चान्ये ।
रथेहि सौवर्णमयेहि चान्ये
प्रत्युद्गमं लेच्छविनो करोन्ति ॥
सर्वे समेत्वा सह ज्ञातिबन्धवो
दहरा च मध्या च महल्लका च ।
अलंकृता सत्कृतरत्नवस्त्रा
प्रत्युद्गता ते च विचित्रचारी ॥

तर्हि दानि गंगायां राज्ञो श्रेणियस्य बिम्बिसारस्य नावासंक्रमं अभ्यन्तरवैशा-

1. C "devâs trâyastriñçâ devâḥ suda" BC "mantâñ. — 2. C "tarahiñ vai" B "vayoyo pa". — 3. BC ihasâye ca bhi" C "ṛiddhiye de". — 5. BC "mâno saññmyak râ(C "ka râ)jyâni kârenti jûâtayo tathâ".

7. C "chavima" BC "madhyâ santo " kâçi trâ". — 9. C trâyatriñçâ" BC "çâ devâ yehi" C "hi tañ dṛishṭapûrvâye udyâ" B "pûrvam udyâ" BC "bhûmim abhi". — 11. B "thâ iyam ṛiddhiḥ leccha" C "thâ ime samṛiddhiḥ lecchaviṇâñ B "nâñ suva".

13. C "kuñjalehi çi" BC "kâhi suvarṇṇa " cânyehi rathe". — 15. BC "tyudgamanañ lecchavino(C "ṇâñ) ka".

17. BC "ndhanâ daharo ca ma". — 19. BC "kṛitâ raktehi rakta " dgatâ ca te(C "tehi) vicitracâri | .

21. BC mâgadhakânâñ caturaçiti sahasrâṇâñ vicitrâṇi | nâvikâ ca tabiñ tâni gañ" C "ñbiçâlasya nâ" B "kramañ | abhya" BC "vaiçârakâ" BC "bâhira " kramañ yehi nâvehi kañbaraçra".

लकानां नावासंक्रमं वाहिरवैशालकानां नावासंक्रमं गंगेयेहि नागेहि कम्बलाश्व-
तरेहि नावासंक्रमो कृतो ॥ भगवानस्मदीयेन उत्तरिष्यतीति ॥

शुक्रेन गोशृंगीये वचनेन भगवां सत्रावकसंघो शुवेतनाथ मक्रेन उपनिमन्त्रितो
तस्य च भगवता तूष्णीभावेनाधिवासितं ॥ तेन शुक्रेन भगवतस्तूष्णीभावेनाधिवा-
सना बुद्धानुभावेन विज्ञाता । सो भगवतः पादा शिरसा वन्दित्वा भगवन्तं भि-
क्षुसंघं च प्रदक्षिणीकृत्वा प्रत्यागतो ॥ येन गोशृंगी भगवती तेनोपसंक्रमित्वा आह ॥
निमन्त्रितो सो भगवां तथागतोऽर्हं सम्यक्संबुद्धो सत्रावकसंघो शुवेतनाथे मक्रेन
स्वद्वचनेन अधिवासितं तेन भगवता तूष्णीभावेन ॥

भगवां नावासंक्रमे आरूढो ॥ राजा श्रेणियो बिम्बिसारो स्वके नावासंक्रमे
भगवन्तं पश्यति । अभ्यन्तरवैशालका च स्वके नावासंक्रमे भगवन्तं पश्यन्ति सत्राव-
कसंघं । बाहिरवैशालका स्वके नावासंक्रमे भगवन्तं पश्यन्ति सत्रावकसंघं । कम्ब-
लाश्वतरा पि गंगेयमहानागा स्वके नावासंक्रमे भगवन्तं पश्यन्ति सत्रावकसंघं तर-
माणं ॥ तेहि कम्बलाश्वतरेहि गंगेयकेहि राज्ञो श्रेणियस्य बिंबिसारस्य पंच
छत्रशतानि दृष्ट्वा वैशालकानां पि पंच छत्रशता दृष्ट्वा तेहि भगवतो तरन्तस्य पंच
छत्रशतानि प्रगृहीतानि । यवेहि पि पंच छत्रशतानि प्रगृहीतानि । चातुर्महा-
राजकेहि पि पंच छत्रशतानि प्रगृहीतानि । सुनिर्मितेनापि देवपुत्रेण ततो विशि-
ष्टतरं छत्रं प्रगृहीतं । परनिर्मितवशवर्तिहि पि चतुर्हि पि महाराजेहि पंच छत्रश-
तानि प्रगृहीतानि । त्रायस्त्रिंशेहि पि देवेहि पंच छत्रशतानि प्रगृहीता । शक्रेणापि
देवानामिन्द्रेण छत्रं प्रगृहीतं । सुयामेनापि देवपुत्रेण छत्रं प्रगृहीतं । तुषितेहि
देवेहि पंच छत्रशता प्रगृहीता । संतुषितेन देवपुत्रेण ततो विशिष्टतरं छत्रं प्रगृहीतं ।
ब्रह्मकायिकेहि देवेहि पंच छत्रशतानि प्रगृहीतानि । महाब्रह्मणापि ततो विशिष्टतरं

2. B "vân anyena uttari" C "vân anyetu uttari". — 3. BC goçriñ" C "gavâo saçrâ" BC "gho çucetanâya" C "bhâvena adhi". — 4. BC "vâsanâñ buddhâ". — 5. C so pi bhagavato pâ" BC "pâdañ çi" C "gavato bhi" B "vanta bhi" C "saṅgho ca pra" B "gato yena".

6. B "gi bhâgava" C "ti nenopa". — 7. C "to rhañ saṅmuya" saṅghañ çucetanâ" B "gho çucetanâ" BC "caneṇa adhi" bhâvena bhaga". — 9¹. C "kramam âruḍhâ B "ḍho rājâ". — 9². G rājâ çre" nbiçâro" BC "svakenopasaṅkra". — 10. BC anyataraṅ vaiçâlakâ-
nâñ svake" paçyati saçrâ" B "saṅghañ bâhi" G "saṅghañ taramâṇañ tehi kañ" (l. 13).

11¹. B kambaraçvatara piṅgaṅgeyamahânâga svake" paçyati | saçrâ". — 13. BC "rehi gaṅgeya" B "râjñâ çre" C "biçâlasya paṅ" vatottaranta". — 15¹. C "kshepihi paṅ". — 15². C "râjikehi" BC "grihitâni.

16. BC sunimite" C "tataḥ viçi". — 17. BC "vartti caturhi". — 18¹. C "strinçâhi pi devaputrehi paṅ" C "grihitâni | B "grihitâ | . — 18². C "chatraçatâni pra" B "hitaḥ suyâ" C "hitâni | C "devaputrehi paṅ".

21¹. C "yike devaputrehi pañca". — 21². B "brahmâṇâpi" C "brahmânâpi" taraṅ paṅ-
caçataṅ chatraṅ".

छत्रं प्रगृहीतं । शुद्धावासेहि देवेहि भगवतो गंगाये तरन्तस्स छत्रपंचशतानि प्रगृहीतानि । महेश्वरेणापि देवपुत्रेण छत्रं प्रगृहीतं भगवतो गंगाये तरन्तस्स ॥ केन तानि सर्वाणि देवमनुष्यकाणि छत्रसहस्राणि समभिभूतानि ॥

आद्विककर्मिकपार्थिवराजान वंशनिवृत्तार्हन्ति ।
अर्हति च महाभागो स एष पुरुषर्षभो छत्रं ॥
ये बाहिरा जयित्वा रिपुसंघा अश्नन्ति अजितराज्या ।
..... संपन्ना ते पि नरा छत्रमर्हन्ति ॥
किं पुन येन समन्ता सर्वक्लेशा जिता निरवशेषा ।
अपि च नमुचि ससैन्यो न तु छत्रशतारहो भगवां ॥
तारकतरुणप्रकाशान्तारकरूपानप्रतिभासां ।
वैडूर्यरतनदण्डां छत्रशतां पंच आदाय ॥
राजा बिम्बिसारो अखति पृष्ठतो दशबलस्य ।
संप्रस्थितो च भगवां वज्जि अभिमुखो सह गणेन ॥
नावाय समभिरूढो भगवां भवति भवौघं उत्तीर्णो ।
पारे च लेच्छविगणाः छत्रशतां पंच धारेन्सुः ॥
अथ पश्चिया महीपतिं महामहीधरमहाबलनिकेता ।
नागा पि गंगनिलया छत्रशता पंच धारेन्सु ॥
ऋद्धिमन्तो द्युतिमन्तो धरणिपथगता महाबलनिकेता ।
यथा पि तत्र असुरा मुदिता छत्रशता पंच धारेन्सु ॥
आगलितमाल्यमुक्ता उडुपतिपरिपूर्णचारुचन्द्रमुखा ।

1. C °devebhi tataḥ gaṁgâ° BC °echatraṁ paṁca°. — 2¹. C °çvarâṇâpi° B °hitaṁ | bhaga° B °tasya yena°. — 2². BC yena tâni ° nushyâṇi echa°. — 4. B âhikarmi° C âdikarmi° B °râjavaṁça(C °çe)ni° C °nirvṛito rhanti | B °rvṛitto rhaṁti | . — 5. BC mahâbhâ(B °bho)go° C °go saisha purushashabho° B °traṁ bâhirâ°.

6. BC bâhirâ ° ghâ âçvanti | ajitârâ(C °nâ)jetvâ sampa°. — 8. BC °punar yena saṁpannâ-(C °nnâṁ) sarvakleçâ nito°. — 9. B °ci sa sasainye na tu° C °sainye na tu ° çatâniruho bhagavân târa° B °vâṁ târa°. — 10. C °prakâçaṁ târa° B °bhâsâṁ vai°.

11. C °ratnadaṇḍâṁ çatra° B °cchatragatâṁ ° dâya râjâ°. — 12. BC °biṁbiçâro° B °ro açvanti | pṛi° C °ro anvati° B °lasya saṁ°. — 13. BC °sthito bhaga ° vajim abhimu ° ṇena nâvâ°. — 14. BC °rûḍho | bha ° bhavaugham uttiṛṇṇo pâre°. — 15. C pâre vaca lecchaviga° BC °paṁca pâretsuḥ atha°.

16. C °paçiya mahîpati° B °çyiya mahîpati° BC °ti mahâ mahîmahîdharalapaniketaḥ | C °mahîdharalayanikato | . — 17. BC °dhârayetsu(C °tsuḥ) | . — 18. B riddhi° BC °mantyo dyu ° dharaṇîpa°. — 19. BC yaccâpi ta ° dhârayetsu(C °tsuḥ) âga°. — 20. BC °mâlâmuktâ udupati° C °ndrasukhâ | .

देवा पि तत्र मुदिता छत्रशतां पंच धारेन्सुः ॥
चतुरो पि लोकपाला प्रमुदितमनसा विगतमद्दनमाना ।
नटकरजविधमनकरा धारेन्सु धरणिधरसमस्य ॥
अथ सो चिदशाधिपतिः कांचनमणिरत्नसुकृतवरजालं ।
रक्तकुसुमसुकृतदामं छत्रं जगाग्रस्य धारेसि ॥
यमवरुणनागवन्दितं यामाधिपतिं उपेत्य वसुयामा ।
शरदभ्रलाभ्रपाण्डरं धारयि घनपवनगतिस्य ॥
तुषितभवनाधिवासी पुन भगवतो उपगतो अप्रमोहो ।
संवर्तितखरसमवपु धारयि छत्रं प्रसन्नमनो ॥
वैडूर्यसुकृतदण्डं प्रावाडदशशतशलाकाचित्रं ।
फुल्लकुसुमास्थिततलं सुनिर्मितो धारये छत्रं ॥
परनिर्मितवशवर्ती निर्मिणे वरकनकभारसंछन्नं ।
रत्नहारलम्बदामं छत्रं त्रैलोक्यकीर्तिस्य ॥
ब्रह्मा प्रसन्नमनसो पवनपथविशुद्धहृदयस्य ।
धारेसि चन्द्रसन्निभं छत्रं परवादिमथनस्य ॥
सप्तरतनामयं पुन दिव्यकुसुमामयं दाममण्डितं ।
छत्रं छत्रारहस्य महेश्वरो धारये छत्रं ॥
इत्येष सुराधिपेन कामावचरो संघो सन्निपतितो ।
महा अभु महेश्वरेण अतुलबलधरस्य पूजार्थं ॥

1. C *traçatâ pañ* BC *retsuḥ | . — 2. BC *madanâ nâṭaka*. — 3. BC nâṭakarajanidhamanuka* B *râ tarayetsu dharaṇiñ dha* C *râ tarayetsuḥ | dhraṇidha*. — 4. BC *ṇiraktasukri* B *jâlañ ca rakta* C *jâlañ va. — 5. B *cchatra dâmañtiyegrasya* C *cchatra dhâmatiye 'çrasya dhâ*.

6. B jamava* BC *ndito yâmâ* C *tya casuyâ* B *yâmâ sarada*. — 7. BC saradajaladatra(C *bhraṁ)pâṇḍa* C *ṇḍalañ dhâresi dhanapavaçe gadhisya B *dhâreyi dhanacapaṇe gatisya tushi*. — 8. C *dhivâsiṁ | pu* BC *punar bhagavatâ tushitâlayât u(C *yâ u)pagata pramo(C *me)hi saṁva*. — 9. B samvarttati khara* C *varttati khara * pu câra* B *pu vâra* BC *raye cchatraṁ*. — 10. B *daṇḍa pravâdadaça* C *ṇḍa pravâradaçaçatasarâkâritaṁ B *kâcitaṁ phulla*.

11. B *sumasthi* C *sumasusthi* BC *sthitalaṁ* C *rnitaṁ dhâ* B *traṁ para*. — 12. B *vartti nirmâṇo vara* C *vartti nimâṇo vara*. — 13. BC ratanahâ* C *hâraṁlaṁbadâma ccha* BC *kyatirttisya hra*. — 14. BC brahmo pra * nasâ pava * yasya dhâre*. — 15. BC *traṁ paravâ*.

16. B *punaḥ divya* C *punar divya * manditaṁ B *ṇḍitaṁ ccha*. — 17. C *trâlayasya* BC *sya loke mahe*. — 18. C ityasau sha* B ityetau sha* BC *shaṭsurâdhipâ(C *paká)kâmâvacarâ saṁgho patita(C *titaṁ) mahâ*. — 19. B mahâ abhibhû mahe* C *hâm abhibhût mahe * tulabaradha*.

भगवता यत्तकानि तानि क्षत्राणि तत्तका बुद्धा निर्मिता ॥ ते अन्यमन्यस्य न पश्यन्ति भगवन्तं ॥ तेषां प्रत्येकंप्रत्येकं एतद्भूषि ॥ मम येव क्षत्रे नाथो तिष्ठति सुगतो तिष्ठति ध्वजो तिष्ठति ॥ देवा च मनुष्या च याव अकनिष्ठभवनं पश्यन्ति बुद्धानुभावेन ॥

अथ भगवां पुरुषचन्द्रो तानभिनिर्मिणे संबुद्धानृद्धिं ।
भगवां विदर्शये न च अन्यमन्यस्य पश्यन्ति ॥
अकनिष्ठभवनगता तु दशबलबुद्धा अम्बरं प्रसदनियं ।
शोभेन्ति गगणतलगता यूपमिव यथा रतनचित्रं ॥
सर्वे सुवर्णवर्णा सर्वे द्वाचिंशलक्षणसमंगी ।
सर्वे कनकगिरिनिभाः सर्वे वरवारणगतीकाः ॥
सर्वे मनापाकाराः सर्वेषां शोभते प्रभाजालं ।
सर्वे अमितगुणधराः सर्वे प्रामोद्यसंजननाः ॥
दृष्ट्वान देवमनुजा गगनतलं शोभन्तं दशबलेहि ।
अतिरिव उद्दिग्धहर्षा हाहाकारं उदीरेन्सुः ॥
आस्फोटितप्रत्वेडितकलकलसमाकुला अभिवर्तन्ति ।
मुंचेन्सु अम्बरगता वरचूर्णरजाकुलं सुरभिं ॥

तं भगवतस्तादृशं बुद्धविकुर्वितं ऋद्धिप्रातिहार्यं दृष्ट्वा अतीव देवा भगवतः पूजां करेन्सुः मान्दारवेहि महामान्दारवेहि कर्कारवेहि महाकर्कारवेहि रोचमानेहि

1¹. C °tattakáni bu° BC °buddha ni°. — 1². B °ntaṁ te°. — 2¹. C °tyekapratye°. — 2². C samaye° BC °maye ccatre° C °nátho tishṭhati dhvaje ti° B °dhvaje tishṭhati devá°. — 3. C devâṁ ca manushyâṁ ca yávad aka° BC °cyati bu°. — 5. C °gavân purushacandro tam abhini° B °ndro tabhini ° ddhiṁ bhaga°.

6. BC °rçaye | na cánya°. — 7. BC °gatâ daçabarabu° B °ddhâ baliṁ pra° C °ddhânâṁjaliṁ pra° B °sadanîyaṁ çobha° C °daniya. — 8. BC çobhati ga ° gatâ yûtham i ° ratnacitrâ | . — 9. BC °ṇṇavarṇṇo sadvâtriṁçallaksha° C °kshasamaṁgi | . — 10. B °bhâḥ | sarve° C °rve balavâ° BC °gatikâḥ sarve°.

11. BC °nâpakarâḥ sa°. — 12. B °nanâḥ dṛishṭvâ°. — 13. B °lehi atiri°. — 14. BC udvila(C °ra)harshâ ° kâram udîretsuḥ âspho°. — 15. C °praktedita° B °kshveḍita° BC °kalâsamâkulâbhivartta°.

16. B muñcetsu bhâmbara° C °cetsu çubhâṁbaragato caraṁ cûrṇṇa° B °gato varacûllarâjâ ku° C °rṇṇarâjâ° B °bhiṁ taṁ°. — 17. C bhaṁgavantaṁ tâdṛi° B °vantaṁs tâ° BC °hârya dṛi ° pûjâ karetsuḥ mandâra° B °karotsuḥ mâ° C °mahâsamantagadhehi pârijâtakapu° B °ndehi pârayâtra ° garucûllehi keçaracûllehi° C °keçalacû ° gavanta okiretsuḥ abhyo° B °retsu abhyokiretsu | sama° C °retsuḥ | sama° BC °shashṭhi yoja° C °gandhecû° BC °tram ogha saṁ° C °vṛittaḥ | .

महारोचमानेहि भीष्मेहि महाभीष्मेहि समन्तगन्धेहि महासमन्तगन्धेहि पारियाचकपुप्फेहि सुवर्णपुप्फेहि रूप्यपुप्फेहि रजतपुप्फेहि चन्दनचूर्णेहि अगरुचूर्णेहि केशरचूर्णेहि भगवन्तमोकिरेन्सु अभोकिरेन्सु समन्तात्पष्टि योजनां दिव्येहि च गन्धचूर्णेहि जानुमात्रमोघो संवृत्तो ॥ भिचू भगवन्तमाहन्सुः ॥ किमयं भगवन्देवानुभावो नागानुभावो यचानुभावो येन इमानि दानि च्छत्रसहस्राणि दिव्येहि च नागेहि च राजानेहि च प्रगृहीतानि ॥ भगवानाह ॥ तथागतस्येष भिचवः पौराणस्य कुशलधर्मस्य अनुभावो ॥ यदि तथागतोऽनुत्तरां सम्यक्संबोधिमभिसंबुद्धो न भविष्यति संसारे संसरन्तो भगवन्तो यत्तका एतानि च्छत्राणि तत्तकानि चक्रवर्तिराज्यानि कारयिष्येत् ॥ अथ च पुनस्तथागतस्य सर्वपुण्यपापचयतो परिनिर्वाणं भविष्यति ॥

भगवान्हानि आयुष्मन्तं वागीशमामन्त्रेसि ॥ प्रतिभातु ते वागीश तथागतस्य पूर्वयोगो ॥ साधु भगवन् आयुष्मां वागीशो भगवतः प्रतिश्रुत्वा तायै वेलायै इमां गाथां वभाषे ॥

अभूच्छास्ता अतीतस्मिं ब्राह्मणो अकुतोभयो ।
प्रहीणजाति ब्राह्मणो ब्रह्मचर्यस्मिं केवली ॥
सत्वां दुःखितां दृष्ट्वान दुःखधर्मसमर्पितां ।
धर्मचक्रं प्रवर्तेसि आभां कासि अनुत्तरां ॥
धर्मचक्रं प्रवर्तित्वा आभां कृत्वा अनुत्तरां ।
संबुद्धो परिनिर्वायेत् महर्षिः चीर्णपुनर्भवो ॥
तस्य स्तूपमकरेन्सु श्रावका अकुतोभया ।
शैचा उत्तमा दान्ताश्च अकरेन्सु कीर्तिहेतवे ॥
चचियब्राह्मणवैश्या पूजां कासि महर्षिणो ।

4². B °vo yânimânyâtâni ccha° C °vo yâni imâni ccha°.

6². B °kshavo pau ° bhâvaḥ. — 7. C °gato nuttarâyâṁ saṁmya° BC °buddhe nâ bhavishyati | saṁ° BC °gavato yatta° C °ttakâni etâ°. — 9. C atha ra pu°. — 10¹. C °mantrayasi. — 10². C °vâgi tathâ°.

11. B sâdhû bha° BC °gavân âyu° C °vâgi bha ° tvâ tâ velâ ° gâthâm abhâ° B °bashâshe | . — 13. C °stâ apitesmiṁ ° hmaṇâ akutobhayâ. — 14. C prahîjâti brâhmaṇo caryyesmiṁ°. — 15. BC °dṛishṭvâ duḥ° C °rpitâḥ | .

16. BC anuttaraṁ dharma° C °cakraṁ âbhâṁ° BC °kâçi anuttaraṁ dharma°. — 17. B °rttitvâ | âbhâṁ° C °ttarâ B °râṁ saṁmyaksaṁbu°. — 18. BC saṁmyaksaṁbu° C °rvâye maharddhi kshîṇo punarbhavet | . — 19. B °retsu çrâ° C °retsuḥ çrâ° BC °vako aku° C °tobha B °bhayâ çai°. — 20. B çaiksho utta° C çaikshân utta ° utâçcâkare° BC °retsu kî° C °hetuvâṁ | B °tavo | .

21. BC kshetri° C °hmaṇâ vai ° kâri ma° B °kâçi maharshiṇo nri°.

नृत्यवादित्रगीतेन नानामाल्यसमागता ॥
ब्राह्मणो पि विचिन्तेति पिता बुद्धस्स पण्डितो ।
यं नूनं छत्तं कारेयं रत्नाकुतं शुभपाण्डरं ॥
विमलं छत्तं सूपरिं अधिरोपिय संचिते ।
अश्रूणि च प्रवर्तेन्तो पिता पुत्रमपूजयि ॥
सो तं कर्म करित्वान कल्याणं बुद्धवर्णितं ।
ब्राह्मणो अकरि कालं जातानामेव धर्मता ॥
संवर्ताच्च विवर्ताच्च अशीतिन्तेन कर्मणा ।
दुर्गतिं नोपलभते एतच्छत्रस्य तत्फलं ॥
मनुष्येषु तदा राज्यं धर्मेण अनुशासयं ।
पृथिव्यां चक्रवर्त्यासि विजितावी महाबलो ॥
चिचा जनपदा आसि अनुयात्रासि चचिये ।
तमेव अपचायेसि श्वेतच्छत्रं ददत्सुखं ॥
ततो चापि च्यवित्वान देवेषु उपपद्यिथ ।
मरुणां प्रवरो आसि देवकायान पूजितो ॥
पूजितो मरुसंघानामैश्वर्यकम्बलक्षितो ।
वसन्तचापि वर्तेसि श्वेतच्छत्रस्य तत्फलं ॥
देवानामुत्तमो आसि मनुष्याणां पि उत्तमो ।
सर्वत्र उत्तमो आसि देवानां मनुजान च ॥
देवानामुत्तमः भूत्वा मनुष्याणां च उत्तमो ।
तं भवद्य विजहित्वान आगत्वा पश्चिमं भवं ।

1. B °tyagitavâdi° C °tyagitaçvavâ ° tena mânâmâlyâ samâ° B °samânatâ | . — 3. C °chatra kâre° BC °reyaṁ nânâkṛitaṁ° B °çubhaṁ pâṇḍaraṁ vima° C °pâṇḍulaṁ. — 4. C vimalaṁ | stû° B °traṁ | stû° BC °stûpaṁse abhirûpiyaṁ citto açruṇi°. — 5. BC açruṇiya pravarttanto(C °nte) pitâ putraṁ pûja°.

6. B °buddhaṁ va°. — 7. C °jâtonâm e°. — 8. B °varttañca vivarttañca a° C °varttа ca °rtta ca açinti tena°. — 9. B °labhyate e° C °labhyante e°. — 10. BC °shu yadâ râ° saye | .

11. B °varttesi viji° C °varttasi vi ° bala | . — 12. C cattâ ja° B cittâ ja° C °nujâtrâ° BC °si kshetriye | . — 13. B °va ayacâ° BC °yetsu(C °tsuḥ) çve° C °dadetsukhaṁ | . — 14. BC tato ca(C °caivaṁ) vadhitvâna° B °veshûpapadyi° C shûpaûpadyi°. — 15. B °pravalo â° C °devadevakâ°.

16. C °marûsaṁghânâm eçva ° mhara° BC °sthitaṁ | . — 17. C vasaṁ tetrâsi varttе°. — 18. B °m utto âsi° C °mo âsi ° ttamaḥ | . — 19. C °tra cotta ° nâṁ ca manushyâṇâṁ ca | B °jânâṁ ca devâ°. — 20. C °ttamaṁ bhû°.

21. C °hitvâ âga ° bhave | .

संबुद्धो पि प्रजायासि ऋषि चीर्णपुनर्भवो ॥
सो तं मार्गं वाभिज्ञाये दुःखप्रशमगामिनं ।
यस्य मार्गस्य प्रतिलाभा दुःखस्यान्तं करीयति ॥
तं चाच ऋतीता बुद्धा तं च वीरो प्रतापवां ।
सर्वे समशीलप्रज्ञा नास्ति बुद्धान ऋन्तरं ॥
ये च ते हि कालेकाले संबुद्धा नाव संशयं ।
सर्वे ते सुगतिं यान्ति आत्मकर्मफलोपगाः ॥
चक्षुमां ब्राह्मणो आसि ऋन्तेवासिस्य ते ऋहं ।
त्वयाहं चोदितो वीर पूर्वां जातिमनुस्मरेत् ॥
एवमेव एतदासि यथा भाषसि वागीश ।
ब्राह्मणो हं तदा आसि ऋन्तेवासी च मे भवं ॥
मया त्वं चोदितः सन्तो पूर्वां जातिमनुस्मरेत् ।
तस्मा ध्वजपताकां च श्वेतच्छत्रं च कारयेत् ॥
वेदिकां चैव स्तूपेषु कुर्यात्पंचांगुलानि च ।
साधु पुण्यवरं विपुलं दायकमधिवर्तति ॥
एषा चान्या च या पूजा बुद्धमुद्दिश्य क्रियते ।
सर्वा ऋवन्ध्या सफला भवति ऋमृतोपगा ॥
न हि ऋर्चनां समां लोके पश्यामि विशिष्टतरां कुतो ।
यं च ऋन्यं पूजयन्तो पुण्यं यासि महत्तरं ॥
सचे कोचिमस्मिं लोकस्मिं सर्वा पि देवता सदा ।

1. BC °pratijânâmi ri(C °ṛi)shi ° rbhave | . — 2. C °rgaṁ câbhi° BC °jñâya duḥ° C °duḥkhâpra ° minâṁ. — 3. C °riyasi | . — 4. BC te citratitâ° C °ddhânâṁ taṁca vi° BC °vira pra° B °pamâṁ | C °pavân | . — 5. BC °çîlâ samapra° C °ddhânam anta°.

6. B °hi kalekâle saṁ° C °hi kalpekâle saṁ° BC °buddhehi atha dvayaṁ | . — 7. B °pagâḥ ca°. — 8. B °ṇo abhi ante ° haṁ tvayâ°. — 9. C °pûrvaṁ jâti°. — 10. BC evam etaṁ dadâsi° C °dâsi taṁ yathâ vâgîça bhâshati | B °gîça brâ°.

11. B brâhmaṇo rhaṁ ta° C °nteväçishṭacâbhavaṁ | . — 12. C °dita santo° BC °pûrvaṁ jâ°. — 13. C tasmâddhvajapatâkaṁ ya çveta°. — 14. B °stûpe kuryâ° C °câdgulâ°. — 15. B sâ puṇya° C °ṇyacaraṁ° B °varâ vipu° BC °pulâ dâya° B °dhivattati | .

16. C eshânyârcayâ pû° B °cânyârcayâ pû ° ddham udviçva kri° C °ddhamûrdddhniçca krîyate | . — 17. C sarvâ bandhyâ ° lâ tonti amṛi° B °lâ bhoti amṛitâpaga nehi°. — 18. B nehi ârauâ samasamaṁ lo° C nehi 'rinâ | samasamaṁ ca loke ° mi vuto vi° B °kuto | viçishṭaraṁ || C °taraṁ yathâ | . — 19. C paṁ cânyaṁ pû° B yaṁ cânyaṁ pûjayanto maha° C °nto saṁvarddhayâsi puṇya maha° B °ttaraṁ yâsi puṇyaṁ | . — 20. B sarvo pacime lo° C sarva paççime lo° BC °loke(B °ko) sannipatitvâ sadevakâ pi(C °kâṁ | te pi) sadâ pû°.

पूजेय सर्वरत्नैः नैवं से प्रतिकृतं सिया ॥
एवं महायशा महाकारुणिका अनुकम्पाहितामिता ।
औदुम्बरमिव कुसुमं न हि सुलभदर्शना संबुद्धाः ॥

अथ ये मे भणन्ति वर्णं समाधितो च ग्रीलतो च प्रज्ञातो च अधिगमनतो च निष्क्रमणतो च प्रयोगतो च जात्यतो च भूततो च भवन्ति महेशाख्या च कृतपुण्या तासुतासु जातीषु आदेयवचना च भवन्ति कीर्तनीया च बहुजनस्य ॥

तेनैव कुशलमूलेनारोपितेन उत्तरिं ।
प्रावरणं अल्पकिसरं तेषां भवति कायिकं ॥
तस्मात्पुण्यानि कुरियात् निचयं सांपरायिकं ।
पुण्यानि परलोकस्मिं निष्ठा भवति प्राणिनां ॥

भगवां गंगामुत्तीर्णो वैशालीये च सीमामाक्रान्तो ॥ भगवता ते अमनुष्यका पलाना ॥ मारेण पापीमता भगवतो गच्छन्तस्य यत्तं लेच्छवीहि मार्गं मुक्तपुष्पावकीर्णं सिक्तसंमृष्टं प्रतिजायितं तं सर्वं प्राणकेहि स्फुटं ॥ निर्मितो कुण्डलो नाम परिव्राजको ॥ सो भगवतो तेन मार्गेण गच्छन्तस्य आह ॥ निवर्तांहि ॥

बहूहि प्राणेहि मही संवृता
अणूहि स्थूलेहि च मध्येहि च ।
बुद्धो यदा गच्छति भूतसंक्षये
अथा ततो उपपद्यति आक्रमे ॥

1. C °sarvaṁ ratnaiḥ naivaṁ patikṛi° B °naiva me patikṛi° BC °kṛitaḥ | asyâ evaṁ°. — 2. C °hitâmitâ | o°. — 3. BC °na hi | surabhâ darçane saṁbu°. — 4. C °ye ca me bha° C prajñâtau ca a ° shkramato prajâgato ca bhûta° B °pato ca | prajoga ° vanti | ma° BC °çâkhyo ca kṛi° B °puṇyo tâsu° C °puṇyo ca tâsutâsu jâtishu° B °âdetavaca ° nti | kirtta°.

7. B te tenai° BC °tena âttari(C °ri)yasya prâ°. — 8. B prâvavane alpa° C °cane alpakiçalena teshâṁ° B °alpakisareṇa teshâṁ° BC °yikaṁ teshâṁ | . — 9. B °kuryât ni° C °kuryâ nica°. — 10. BC °lokesmiṁ nishṭâ bha°.

11¹. C bhagavâna gaṁ °çâliye ca çimâm âkramantâ° B °ca çimâ âkrantâ | . — 11². BC °tâ tena ama° B °lânâ mâre° C °lânâḥ | . — 12. B °mârgaḥ mukta° C °mârge mukta° B °kirṇṇo sikta° BC °ktasaṁsṛishṭaṁ ° grito taṁ° C °sarve prâ° B °prânake° BC °spute nirmi°. — 13. B °ṇdalayâ nâma ° jako so bha°. — 14²-15. BC °rttâhi avîci(C °vici) prâṇakehi mahi saṁvṛito(C °tte) anuhi ° lehi madhye°.

17. B °tasastṛite° BC °vyathân tatopapa° B °âkramaṁ ‖ C °âkramanaṁ ‖ .

भगवानाह ॥

मृदु संस्पर्शः यो तथागतानां
तूर्णं यथा ओतरितमारुतानां ।
न हि वृद्धश्रेष्ठान तथागतानां
शरीरमागम्य वधो प्रजायति ॥
मयचेतना नास्ति विहेठना वा
प्राणेषु सो गच्छति अप्रतिघो भगवान् ।
सर्वेहि भूतेहि निवापपण्डं
भगवता हरितशाद्वलं निर्मितं ॥

भगवां उपविष्टो भिक्षुसंघो च ॥ ते लेच्छवयो भगवन्तं पृच्छन्ति ॥ कस्य भगवता शुवे आगारमधिवासितं अभ्यन्तरवैशालकानां बाहिरवैशालकानां वा ॥ भगवानाह ॥ न हि वासिष्ठाहो अभ्यन्तरवैशालकानां तथागतेनाधिवासितं न बाहिरवैशालकानां ॥ गोशृंगीये मनुष्यालापिको शुको प्रेषितो गंगाये पारं । तेन तथागतो सश्रावकसंघो गोशृंगीये वचनेन शुवेतनाय भक्तेन उपनिमन्त्रितो । तथागतेनाधिवासितं ॥ ते दानि लेच्छवयो अभ्यन्तरवैशालका च दुवेचतुरशीति राजान सहस्राणि अन्यो च महाजनकायो चचियमहाशाला गृहपतिमहाशाला विस्मयसम्पन्नाः कथं शुको जल्पतीति ॥ भगवानाह ॥ किमत्रार्थं गोशृंगीये शुको जल्पति मानुषिकाय वाचाय । अन्येहि पि वासिष्ठाहो पक्षिभूतेहि राज्यं व्यवहरितं ॥

भूतपूर्वं वासिष्ठाहो अतीतमध्वाने नगरे वाराणसी काशिजनपदे ब्रह्मदत्तो नाम राजा राज्यं कारयति कृतपुण्यो महेशाख्यो महाबलो महाकोशो महावाहनो । तस्य च राज्यं ऋद्धं च स्फीतं च क्षेमं च सुभिक्षं च आकीर्णजनमनुष्यं च चक्रजनम-

2. BC °rçaḥ brâhmaṇa yo ta° B °tânâṁ | tû° C °tûrṇṇa ya° BC °thâ etaritamârutenâ na hi°. — 4. BC °çreshṭona tathâ° riraṁm âgamya vadho pra° C °jâpatiḥ B °jâya(? ou °pa?)ti âbha°.

6. B âbhayanâceta° C abhâyanâceta° BC °nâ vâ | punaḥ sarvapâṇishu so° C °pratishyo bhaga° B °gavân sarve°. — 8. BC °nivâpadaṇḍaṁ° C °ritasâhvayaṁ ni° B °ritasâhvalaṁ | nirmitaṁ bha°. — 10². B °cchanti kasya°. — 10³. C °vato çuve° BC °ve âgiram a° B °lakâna bâhiṁraṁ vaiçâ° C °hiraṁvaiçâ°.

12. BC °vâçishṭâ° sitaṁ | na bâ°. — 13¹. C °giye anushyalopiko° B °nushyalâpi° BC °ye pâran tena°. — 13². BC °gato çrâva° B °vako saṁgho° BC °çucetanâ°. — 15. BC °ntaraṁ vaiçâ° C °lakâ duve° B °çitiṁ râjâ° C °anye ca ma° kâye kshetri° B °kâyo | kshe° çâla gri° C °çâlâḥ vi° B °çâlâ | vi° C °lpati iti | .

18. BC anye pi vâçishṭâ(C °shṭo)ho pa °jyaṁ vyapahu°. — 19. BC °vâçishṭâ° B °vâṇâraçi kâçi° C °ṇasi kâçi° BC °hâbaro ma°.

21. C °maṁ ca sûtikahaṁ ° shyaṁ ca sukhita° B °nushyâkarṇṇaṁ° C °shyaṁ ca bahojanamanushyâkarṇṇaṁ ca praçâ° BC °ḍamara sumi ° skara vyava ° mpannaṁ visti°.

नुष्याकीर्णं च सुखितजनमनुष्यं च प्रशान्तदण्डडमरं सुनिगृहीततस्करं व्यवहार-
सम्पन्नं ॥ विस्तीर्णं च अन्तःपुरो अपुत्रो च ॥ तस्य राज्ञो भवति ॥ कथं मे पुत्रो
भवेया ॥ स शृणोति अमात्यानां ॥ अनुहिमवन्ते आश्रमे ऋषयो महानुभावा
प्रतिवसन्ति पंचाभिज्ञा चतुर्ध्यानलाभिनो ते पृच्छितव्या कथं पुत्रो भवेय । ते महा-
5 नुभावा ऋषयो आचिक्षिष्यन्ति यथा देवस्य पुत्रो भविष्यति ॥ सो दानि राजा
सान्तःपुरो सकुमारामात्यो सबलवाहनो येन तेषामृषीणामाश्रमस्तेन संप्रस्थितो ॥
अन्तरमार्गे वासमुपगतो राजा सबलवाहनो सान्तःपुरो ॥ तेन तहिं दृष्टा साम्व-
लीकोटरातो चयो पक्षियो निर्यान्तायो उलूकी शारिका शुकी ॥ तस्य दानि
राज्ञो दृष्ट्वा कौतूहलं संजातं ॥ तेन पुरुषो आणत्तो गच्छ जानाहि किमत्र कोटरे ॥
10 सो आरुह्य निध्यायति पश्यति चीणि अण्डकानि ॥ सो आह ॥ देव चीणि अण्ड-
कानि ॥ राजा आह ॥ पृथक्पृथक्पुटके बन्धित्व ओतारेहि यथा न विपद्यन्ते ॥
तेन पुरुषेण पुटकस्थिं पृथक्पृथग्बन्धित्व ओतारिता अविपन्नाः ॥ अमात्या पृच्छी-
यन्ति ॥ कस्येमानि अण्डकानि ॥ अमात्या आहुः ॥ एतेषां खु शाकुन्तिका
पृच्छीयन्ति । एतेषामत्र विषयो ॥ शाकुन्तिका शब्दापिता ॥ शाकुन्तिका राज्ञा
15 पृच्छीयन्ति ॥ राजा आह ॥ भो भणे जानाथ कस्य इमान्यण्डकानि ॥ ते तत्र
चरिता शाकुन्तिकाः सर्वेषां पक्षीजातीनां अण्डकानां विधिज्ञा पक्षिणां पि वि-
धिज्ञा यो यादृशो पक्षीति ॥ ते आहन्सु ॥ महाराज इमानि चीण्यण्डकानि
एकमुलूकीये द्वितीयं शारिकाये तृतीयं शुकीये ॥ राजा आह ॥ किं भव्यान्येतानि
अण्डकानि अभिनिर्भेदाय ॥ ते आहन्सुः ॥ भव्यानि महाराज ओतारितानि

2¹. B °tro ca tasya°. — 2². B °vati kathaṁ°. — 2³. B °veyâ sa çri°. — 3¹. B °ṇoti | amâ° BC °tyânâm ahima°. — 3². BC ahima° C °bhâvo prati° B °pricchatavyâ | kathaṁ me pu°. — 4. C °mahâbhâvâ° B °bhâvâ vâ ṛisha° C °âcikshavi yadâ de° B °shyanti | yadâ de°. — 5. BC °mâro mâtyo°.

7¹. C °rgeṇa vâsa° B °vâhanâ sântahpuro tena°. — 7². BC °dṛishṭvâ sâmpariko° B °kotharâ° C °kottarâjo trayo° BC °yo nirvântâyo | ulûkî çâlikoṇḍakî | . — 8. B °râjñoḥ dṛi° C °jño tâṁ dṛi ° halaṁ jâtaṁ | . — 9. C °ṇattaṁ gaccha yânâhi ° tra totâre | B °kotâre | . — 10¹. C °ti triṇya° B °triṇyâçukâni ‖ . — 10². BC °va triṇi a° C °ṇḍajâni | .

11¹. B °kpuḍha(ou ṭa?)ke° BC °ndhiya te târe ° thâ nopa° C °nopadyate | B °dyate | . — 12. B °poḍha(ou ṭa?)kesmiṁ C °ṭakesmiṁ ° kpṛithakabandhi° B °gbandhiya° BC °ya te târi°. — 13¹. C °mânyaṇḍa°. — 13². B °shâṁ çâku° C °shâṁ ku çâku°. — 14¹. BC °teshâṁm atra ° shayo çâ°. — 14². B °pitâ çâ°. — 14³. C °râjâ pṛi°. — 15¹. C °âhaḥ | . — 15². BC ho bhane° C °jânatha kasyemâṇḍa° B °kasyamâṇyaṇḍa°. — 15³. C °ṇḍajânâṁ ° jñâ yo pâdṛi° BC °pakshi te a°.

17¹. BC te ahansu(C °tsuḥ) | . — 17². C bhavyâni mahâ ° imâṇi triṇya° B °ni triṇya° C °lûkiyo dvi° BC °çâlikâye°. — 18². C °ṇḍajâni abhiniveçanâyaṁ | B °ni abhiniveçanâya ‖. — 19². C mahârâja bhavyâni bhâripâṇi avi° B °râja bhâripâṇi avi°.

अविपन्नानि ॥ राजा पृच्छति ॥ को एतेषामण्डकानामुपचारो यदैते उपचीर्णा विवेन्मुः स्वस्तिना च अभिनिर्भेदं गच्छन्ति ॥ शाकुन्तिका आहन्मुः ॥ महाराज विहतं कार्पासं उभयचाश्रये संस्तरितव्यं ॥ तच्च एतानि अण्डकानि मधुसर्पिषा अक्षिला निषिण्णव्यानि उपरि विहतं कार्पासन्तमेते मातृकार्थं पोषिष्यति ॥ यथा तेहि शाकुन्तिकेहि आणत्तं तथा तानि अण्डकानि निषिण्णानि ॥ राजा तं ऋषीणामाश्रममनुपूर्वेणानुप्राप्तो ॥ एकान्तेन बलवाहनं स्थापयित्वा सान्तःपुरो ऋषीणामाश्रममुपसंक्रान्तो ॥ ऋषयो राजानं दृष्ट्वा प्रत्युद्गताः यथा ऋषीणां समुदाचारो ॥ स्वागतं महाराज अनुरागतं महाराज निषीदतु महाराजा इमान्यासनानि ॥ राजा सान्तःपुरो ऋषीणां पादा वन्दित्वा निषण्णो ॥ ऋषीणां महत्तरको कुलपती ॥ सो तं राजानं प्रतिसंमोदेत्वा पृच्छति ॥ किं महाराज आत्मनो प्रयोजनं ऋषीणां सकाशातो ॥ राजा आह ॥ मम विस्तीर्णो अन्तःपुरो न कस्याचित्पुत्रो अपुत्रो स्मि यं इच्छामि संदिश्यतु यथा मे पुत्रो भवेय ॥ ऋषीणां महत्तरको आह ॥ महाराज यानि तानि चीणि अण्डकानि अमुकातो शाम्बलीकोटरतो ओतारितानि तानि वेष्टावेहि ततो ते पुत्रा भविष्यन्ति ॥ राजा विस्मितो ॥ महाभागा इमे ऋषयो यन्तं नाम यं इमानि अमुकातो शाम्बलीकोटरातो चीणि अण्डकानि ओतारापितानि इमेषामिह आश्रमे प्रतिवसन्तानां विदितं । महाभागा इमे ऋषयो ॥ सो ऋषीणां पादा वन्दित्वा भूयो वाराणसीं संप्रस्थितो । अनुपूर्वेण वाराणसीं प्रविष्टो ॥ तानि अण्डकानि कालेन समयेन सर्वाणि चीणि प्रभिन्नानि ॥

1¹. C °pricchacchati | . — 1². C ko eshâṁ aṇḍajânâṁ u° C °cirṇṇa te | vidye° B °rṇṇâ ta vidye° BC °dyetsuḥ | sva° B °stino ca°. — 2¹. C °âhatsuḥ | . — 2². B °râjâ vibetaṁ kâryâsaṁ° C °vibetu karyâsam ubhayaṁ yatrâ° B °trâçrnye°. — 3. C tatraitâni aṇḍajâni° rpishâ prâkshipitvâni upari° B °nikshitavyâni° C °vihartuṁ karpâ° B °taṁ karpâ° BC °poshashya° C °shyanti | . — 4. C °aṇḍajâni°. — 5. BC °ṛishiṇâṁ â° C °çramaṁ anu°.

6. C °kânte bala° B °ntaḥpurâ ṛi° BC °ṛishiṇâṁ°. — 7. B °dgatâḥ | ya ° câro svâ°. — 8. C °hârâjânurâ° BC °hârâja imâ(B °mâṁ)nyâsa°. — 9¹. C râja sâ° B °hpurâ ṛi° C °ṛishiṇâṁ° BC °nisharṇṇo ṛishi°. — 9². B °pati so taṁ°. — 10¹. BC °moditvâ pṛi°. — 10². C °âtmânaṁ pra° B °tmana prayojanaṁ | ṛi° C °kâçote | .

